टिप्पणी

209sk13

13

# करुणापरा हि साधवः

बच्चो! आपने भगवान बुद्ध का नाम सुना ही होगा। 'जातकमाला' में इन्हीं भगवान बुद्ध के पूर्वजन्मों के आख्यान संगृहीत हैं जिनमें उनका नाम सर्वत्र 'बोधिसत्त्व' प्रसिद्ध है। प्रस्तुत पाठ में बताया गया है कि महात्मा लोगों का ऐश्वर्य व अधिकार सम्पन्नता तथा विपन्नता में भी उनकी जीवों के प्रति अनुकम्पा को शिथिल नहीं करते। एक बार बोधिसत्त्व संयम, करुणा, परोपकारादि गुणों से सम्पन्न देवताओं के राजा इन्द्र हुए। उन्होंने विपत्ति में भी अपने स्वयं के जीवन की रक्षा की अपेक्षा 'गरुड़' पक्षी के बच्चों की रक्षा को अधिक महत्त्व दिया। महापुरुषों का हृदय करुणा से परिपूर्ण होता है। अतः हमें भी सभी जीवों पर करुणा करनी चाहिये।

## उद्देश्यानि

**इमं पाठं पठित्वा भवान्/भवती**

- पाठस्य कथायाः सारं लेखितुं समर्थः भविष्यति;
- कथावाक्यानि घटनाक्रमेण पुनर्व्यवस्थापयिष्यति;
- शक्रस्य चरित्रचित्रणं करिष्यति;
- जीवने करुणा-संयम-परोपकारादि-भावानां महत्त्वं लेखिष्यति;
- तत्पुरुषसमासस्य पदानां विग्रहं कर्तुं शक्ष्यति;
- यावत्-तावत् अव्यय-युग्मस्य वाक्ये प्रयोगं करिष्यति;
- उपपदविभक्तीनां प्रयोगं करिष्यति।

टिप्पणी

## क्रियाकलापः 13.1



चित्र 13.1



चित्र 13.2

चित्रं दृष्ट्वा अधः प्रदत्तशब्दानां सहायतया कथापूर्तिः कर्तव्या।

(1) एकदा राजकुमारः सिद्धार्थः खगानां ............पश्यन्............आसीत्।

(2) तदैव बाणेन ............ एकः हंसः अपतत्।

(3) राजकुमारः हंसम् उत्थाप्य ............ निष्कासितवान्।

(4) तस्य भ्राता देवदत्तः आगत्य राजकुमारम् अवदत् भो मम भक्ष्यं हंसं ............।

(5) रक्षकः भक्षकात् श्रेयान् इति उक्त्वा राजकुमारः तस्मै हंसं न ............।

| विद्धः, अयच्छत्, नीडानि, देहि, शरम्, उपविष्टः |
|---|

एवमेव सः सिद्धार्थः अन्यस्मिन् जन्मनि अपि कं कं परोपकारं करोति इति पठामः।

## 13.1 इदानीं मूलपाठं पठामः

### प्रथमः एकांशः

एकदा बोधिसत्त्वः स्वपुण्यप्रभावात् दानसंयमकरुणादिभिः गुणैरलङ्कृतः देवानामधिपः शक्रः अभवत्। तस्य प्रासादे राजलक्ष्मीः शशिनः प्रभेव अधिकम् अराजत। नानासुखभोगसमन्विताऽपि सा लक्ष्मीः तस्य हृदयं दर्पमलिनं नाकरोत्।

**शब्दार्थ**

अधिपः = स्वामी, प्रासादे = महल में, अराजत = सुशोभित हुई, समन्विता = युक्त, दर्पमलिनं = घमंड के मैल से युक्त,

तस्य शक्रस्य सर्वलोकेषु व्याप्तां कीर्तिम् अत्यद्भुतां लक्ष्मीं च असहमानाः दैत्यगणाः ईर्ष्यालवः जाताः। ते द्विरद-रथ-तुरग-पदातियुक्तेन महता सैन्यबलेन एनम् आक्रान्तवन्तः। तदा शान्तिप्रियोऽपि स शक्रः प्रजारक्षणाय युद्धाय तत्परोऽभवत्।,

अथ स महासत्त्वः विविधायुधैः सुसज्जितः सध्वजं हैमरथम् अभिरुह्य महता हस्त्यश्व-रथ-पदाति बलेन परिवृतः असुरसैन्यम् अभ्यगच्छत्। तत्र च समुद्रतीरान्ते एव रणः प्रारब्धः। प्रवृत्ते रणे पटहानां भटानां च प्रतिध्वनितैः शब्दैः नभस्तलं स्फुटितमिव जातम्।

## द्वितीयः एकांशः

एवं हि परस्परं युध्यमानेषु सत्सु असुराणां विषदग्धेभ्यः शस्त्रेभ्यः भीता सुरेन्द्रवाहिनी पलायनम् अकरोत्। एकलः बोधिसत्त्वात्मकः सुरेन्द्रः एव रथेन असुराणां बलम् अवरुध्य समरेऽतिष्ठत् ततः सारथिः मातलिः 'अपसरणम् एव इतः उचितम्' इति मत्वा देवेन्द्रस्य स्यन्दनं न्यवर्तयत्।

अथ यावत् शक्रः अग्रे सरति तावत् स समुत्पततः रथस्य अग्रे आगतानि शाल्मलीवृक्षे गरुडनीडानि पश्यति। दृष्ट्वैव स करुणापरः मातलिम् उवाच 'अजातपक्ष-पक्षिशावकैः युक्ताः एते खगालयाः रथवेगेन ते यथा अधः न पतेयुः' तथा मे रथं वाहय। मातलिरुवाच-साधो! दैत्याः समभियान्ति। शक्रः उवाच-ततः किम्? "परिरक्ष सम्यग् गरुडनीडानि" इति। मातलिः पुनरुवाच- हे स्वामिन्! अस्य रथस्य निवर्तनात् केवलं पक्षिणां शिवं भवेत्। राक्षसवाहिनी तु अस्मान् प्रति अभिधावत्येव। अतः इदानीं तु पक्षिरक्षणापेक्षया आत्मरक्षणम् एव श्रेयस्करम्।

## तृतीयः एकांशः

अथ देवेन्द्रः शक्रः करुणाम् आपन्नः सन् उवाच-दैत्यराजेन सह मृत्युरेव वरं परं भयदीनमुखानि एतानि सत्त्वानि रथवेगेन संचूर्ण्य मलिनयशसः मे जीवितं धिक्! तदा मातलिः तथा, इत्युक्त्वा तुरगसहस्त्रयुक्तं रथं निवर्तितवान्।

ततोऽसुराः पुरायान्तं तस्य देवेन्द्रस्य रथं विलोक्य तत्पराक्रमस्य अतिशयसंभावनया भयाकुलाः प्रणतिं गताः। अनन्तरं सहर्षलज्जैः देवैः सत्क्रियमाणः जयश्रिया अलङ्कृतः शक्रः स्वपुरम् अगच्छत्। तस्मादुच्यते-

पापं समाचरति वीतघृणो जघन्यः<br>
प्राप्यापदं सघृण एव तु मध्यबुद्धिः<br>
प्राणात्ययेऽपि तु न साधुजनः स्ववृत्तिं<br>
वेलां समुद्र इव लङ्घयितुं समर्थः।।

**टिप्पणी**

द्विरद = हाथी, तुरगः = घोड़ा, पदातिः = पैदल, अभ्यगच्छत् = सामने आ गया, सध्वजं = ध्वज से युक्त, हैमम् = सोने से बने हुए, अभिरुह्य = चढ़कर, बलेन = सेना से, परिवृतः = घिरे हुए, रणः = युद्ध, प्रारब्धः = प्रारम्भ हुआ, पटहानां = नगाड़ों के, भटानां = योद्धाओं के, स्फुटितमिव = फट सा गया, सत्त्वानि = जीव, प्रणतिं गताः = आत्म समर्पण कर दिया, वीतघृणः = निर्दयी, जघन्यः = नीच, सघृणः = दयालु, प्राणात्ययेऽपि = प्राण चले जाने पर भी, वेलां = तट, करुणापरः = दयालु, शक्रः = इन्द्र

अवरुध्य = रोककर, समरे = युद्ध में, अपसरणम् = भागना, स्यन्दनं = रथ को, न्यवर्तयत् = लौटा दिया, यावत् = ज्योंही, सरति = जाता है, तावत् = त्योंही, समुत्पततः = उड़ते हुए, नीडानि = घोंसले, मातलिः = इन्द्र का सारथि, शावकैः = बच्चों से, वाहय = चलाओ, समभियान्ति = सामने आ रहे हैं, शिवं = कल्याण, आपन्नः = प्राप्त, सत्सु = होने पर, विषदग्धेभ्यः = विष में बुझे हुए, सुरेन्द्रवाहिनी = देवसेना, पलायनम् = भागना, एकल = अकेले

टिप्पणी

## बोधप्रश्नाः

**1. मूलपाठं पठित्वा रिक्तस्थानपूर्तिं कुरुत।**

(क) तस्य प्रासादे राजलक्ष्मीः ............ अधिकम् अराजत।

(ख) तदा शान्तिप्रियोऽपि स शक्रः ............ युद्धाय तत्परोऽभवत्।

(ग) अतः इदानीं तु पक्षिरक्षणापेक्षया ............ एव श्रेयस्करम्।

(घ) पापं समाचरति ............ जघन्यः

**2. 'अ' स्तम्भस्य वाक्यांशैः सह 'ब' स्तम्भस्य वाक्यांशानां मेलनं कुरुत।**

| 'अ' | | 'ब' |
|---|---|---|
| (क) तस्य शक्रस्य अत्यद्भुतां लक्ष्मीं च असहमानाः | (i) | पक्षिणां शिवं भवेत्। |
| (ख) अस्य रथस्य निवर्तनात् केवलं | (ii) | शक्रः स्वपुरम् अगच्छत्। |
| (ग) सहर्षलज्जैः देवैः सत्क्रियमाणः | (iii) | दैत्यगणाः ईर्ष्यालवः जाताः। |
| (घ) यावत् शक्रः अग्रे सरति | (iv) | मे जीवनं धिक्। |
| (ङ) मलिनयशसः | (v) | तावत् शाल्मलीवृक्षे गरुडनीडानि पश्यति। |

## 13.2 अधुना पाठम् अवगच्छामः

### 13.2.1 प्रथमः एकांशः

***एकदा बोधिसत्त्वः ....... स्फुटितमिव जातम्।***

### व्याख्या

(1) **बोधिसत्त्वः**

'बोधि' का अर्थ है– ज्ञान प्राप्ति की साधना में प्रवृत्त। 'सत्त्व' का अर्थ है 'जीव' अर्थात् बुद्धत्व (ज्ञान) की प्राप्ति से पूर्व जीव जब ज्ञानसाधना में संलग्न रहता है तब उसे बोधि सत्त्व कहा जाता है। यह शब्द विशेष रूप से महात्मा बुद्ध के लिए प्रयुक्त होता है।



टिप्पणी

(2) **दर्पमलिनम्-**

'दर्प' का अर्थ है 'घमण्ड'। सत्ता अधिकार और धन आदि की उपलब्धि के कारण स्वयं को दूसरे मनुष्यों से श्रेष्ठ मानना यह बहुत बड़ा दोष है। शक्र के महल में सभी प्रकार के सुख साधन वाली राजलक्ष्मी विराजमान थी फिर भी इस ऐश्वर्य से शक्र का हृदय कभी भी घमण्ड से मलिन नहीं हुआ।

(3) **शान्तिप्रियोऽपि**

देवेन्द्र सत्ता सम्पन्न एवं वीर होने पर भी शान्तिप्रिय थे। अर्थात् शान्तिपूर्वक राज्य का संचालन करते थे। किन्तु जब दैत्यगणों ने उनके राज्य पर आक्रमण कर दिया तो उन्होंने भी प्रजाजनों की रक्षा हेतु एक बहुत बड़ी सेना के साथ दैत्यों से युद्ध करने के लिए प्रस्थान किया। इस प्रकार उन्होंने अपने इस व्यवहार से सिद्ध किया कि प्रजाजनों की रक्षा के लिए युद्ध करना राजा का प्रथम कर्त्तव्य है।

## व्याकरणबिन्दवः

### सन्धिविच्छेदः-

| | | | |
|---|---|---|---|
| अत्यद्भुताम् | = | अति + अद्भुताम् | (यण्) |
| अभ्यगच्छत् | = | अभि + अगच्छत् | (यण्) |
| गुणैरलङ्कृतः | = | गुणैः + अलङ्कृतः | (रुत्व) |
| शान्तिप्रियोऽपि | = | शान्तिप्रियः + अपि | (उत्व, गुण पूर्वरूप) |
| प्रभेव | = | प्रभा + इव | (गुण) |
| नाकरोत् | = | न + अकरोत् | (दीर्घ) |

### समस्तपदानां विग्रहः

| | | | |
|---|---|---|---|
| राजलक्ष्मीः | = | राज्ञः लक्ष्मीः | षष्ठीतत्पुरुषः |
| दर्पमलिनम् | = | दर्पात् मलिनम् | पञ्चमीतत्पुरुषः |
| शान्तिप्रियः | = | शान्तिः प्रिया यस्य सः | बहुव्रीहिः |
| प्रजारक्षणाय | = | प्रजानां रक्षणाय | षष्ठीतत्पुरुषः |
| महासत्त्वः | = | महान् चासौ सत्त्वः | कर्मधारयः |
| समुद्रतीरान्ते | = | समुद्रतीरस्य अन्ते | षष्ठीतत्पुरुषः |

## पाठगतप्रश्नाः 13.1

1. **अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत।**

(क) बोधिसत्त्वः कीदृशैः गुणैः विभूषितः शक्रः अभवत्?

..........................................................................

टिप्पणी

(ख) शक्रस्य कीर्तिः कुत्र व्याप्ता अभवत्?

.......................................................................

(ग) शान्तिप्रियः शक्रः किमर्थं युद्धाय तत्परः अभवत्?

.......................................................................

(घ) देवासुरयोः मध्ये कुत्र युद्धम् अभवत्?

.......................................................................

2. **अधोलिखितकथनेषु शुद्धं कथनं (√) इति चिह्नेन अशुद्धं च (×) इति चिह्नेन अङ्कितं कुरुत।**

(क) एकदा बोधिसत्त्वः देवानामधिपः शक्रः अभवत्। .............

(ख) शक्रस्य राजलक्ष्मीः तस्य हृदयं दर्पमलिनम् अकरोत्। .............

(ग) परिरक्ष सम्यग् गरुडनीडानि इति शक्रः कथयति। .............

(घ) प्राणानां संकटे तु साधुजनः स्ववृत्तिं त्यजति। .............

3. **उचितपदेन वाक्यपूर्तिं कुरुत–**

धिक्, अलङ्कृतः, प्रारब्धः, अवरुध्य

(1) पुरा दान-दया-सत्यादिगुणैः ............ युधिष्ठिरः नरपतिः अभवत्।

(2) एकदा कुरुक्षेत्रे कौरव-पाण्डवयोः मध्ये महान् रणः ............।

(3) एकलः अभिमन्युः कौरवबलम् ............ समरे अतिष्ठत्।

(4) ............कौरवान्, यत् सर्वे मिलित्वा अभिमन्युम् प्राहरन्।

## 13.2.2 द्वितीय एकांशः

***एवं हि परस्परं ....... एव श्रेयस्करम्।***

**व्याख्या**

**अपसरणम् एव इतः उचितम्–**

यहाँ से दूर चला जाना ही उचित है। समुद्र तट पर जब शक्र और दैत्यों की सेना परस्पर युद्ध कर रहे थे तभी असुरों ने विष से बुझे शस्त्रों से देवसेना पर भयंकर प्रहार किया। इन विषैले शस्त्रों के भय से देवसेना भाग खड़ी हुई। युद्धस्थल पर केवल शक्र ही डटे हुए थे।

तब सारथि मातलि ने सोचा कि इस विषम परिस्थिति में यहाँ से भागना ही सर्वथा उचित है अर्थात् महाराज की प्राणरक्षा अत्यावश्यक है।

**गरुडनीडानि**

मातलि सारथि युद्धस्थल से जब रथ को वापस लेकर चला तब शक्र को उड़ते हुए रथ के मार्ग में सेमल के पेड़ पर लटकते हुए गरुड़ पक्षी के घोंसले दिखाई दिये जो रथ के वेग से गिरकर नष्ट हो सकते थे। गरुड़ को पक्षियों का राजा कहा गया है। इसका सिर, पंख, पंजे तथा चोंच गीध के समान होते हैं। इसका मुख श्वेत, पंख लाल तथा शरीर की कान्ति स्वर्णसमान होती है। गरुड़ को विष्णु का वाहन भी कहा गया है।

**केवलं पक्षिणां शिवं भवेत्**

युद्ध के मैदान से वापस जाते हुए जब रथमार्ग में आये गरुड़ पक्षी के घोंसलों को देखा तो दयावश शक्र ने सारथि मातलि से इन्हें बचाने के लिए कहा। सारथि ने कहा, हे स्वामी! दैत्य हमारा पीछा करते हुए आ रहे हैं एवं यदि रथ वापस लौटाते हैं तो इससे केवल पक्षियों की ही रक्षा होगी किन्तु हम दैत्यों के हमले का शिकार हो जाएंगे अर्थात आप राजा हैं और इस समय पक्षियों की रक्षा की अपेक्षा आपकी रक्षा करना अत्यन्त आवश्यक है।''

## व्याकरणबिन्दवः

**(क) सन्धिविच्छेदः**

| | | |
|---|---|---|
| सुरेन्द्रः | = | सुर + इन्द्रः |
| दृष्ट्वैव | = | दृष्ट्वा + एव |
| खगालयाः | = | खग + आलयाः |
| मातलिरुवाच | = | मातलिः + उवाच |
| अभिधावत्येव | = | अभि + धावति + एव |

**(ख) समस्तपदानां विग्रहः समासनाम च**

| | | | |
|---|---|---|---|
| सुरेन्द्रवाहिनी | = | सुरेन्द्रस्य वाहिनी | (ष.तत्पुरुषः) |
| गरुडनीडानि | = | गरुडस्य नीडानि | ('') |
| खगालयाः | = | खगानाम् आलयाः | ('') |
| आत्मरक्षणम् | = | आत्मनः रक्षणम् | ('') |

**(ग) प्रकृतिप्रत्ययविभागः**

| | | |
|---|---|---|
| अवरुध्य | = | अव + √रुध् + ल्यप् |
| दृष्ट्वा | = | √दृश् + क्त्वा |
| मत्वा | = | √मन् + क्त्वा |
| युक्ताः | = | √युज् + क्त + पुं. प्रथमा बहुवचनम् |

## पाठगतप्रश्नाः 13.2

1. **प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत।**

(क) विषदग्धेभ्यः शस्त्रेभ्यः भीता कस्य सेना पलायिता?

..........................................................................

(ख) 'अपसरणम् एव इतः उचितम् इति कः अकथयत्?

..........................................................................

(ग) खगालयाः कीदृशैः पक्षिशावकैः युक्ताः?

..........................................................................

(घ) परिरक्ष सम्यक् गरुडनीडानि इति कः कम् प्रति कथयति?

..........................................................................

2. **उदाहरणम् अनुसृत्य उचित-अव्ययपदेन रिक्तस्थानपूर्तिं कुरुत।**

यावत्, तथा, इतः, तत्र, तदा

**उदाहरणम्** यावत् मेघः गर्जति तावत् मयूरः नृत्यति।

(क) ............परीक्षा भवति तावत् अन्तः कोऽपि न प्रविशति।

(ख) यथा देशः ............वेषः।

(ग) ............ प्रभा गमिष्यति ततः उषा आगमिष्यति।

(घ) यदा दैत्यसेना आक्राम्यति ............ शक्रः अपि योद्धुम् उद्यतः भवति।

3. **कोष्ठकाद् चित्वा उचितपदेन रिक्तस्थानपूर्तिं कुरुत।**

(क) ............ भीता देवसेना पलायिता। (दैत्यैः/दैत्येभ्यः)

(ख) ............अग्रे मार्गे खगालयाः आसन् (रथात्/रथस्य)

(ग) ............ नीडानि न पतेयुः (वृक्षस्य/वृक्षात्)

(घ) दैत्यसेना ............प्रति धावति। (देवसेनाम्/देवसेनानाम्)

### 13.2.3 तृतीयः एकांशः

***अथ देवेन्द्र ....... तस्मादुच्यते ....... पापं ....... समर्थः।***

**1. मलिनयशसः मे जीवितं धिक्!**

इसका अर्थ है 'यश मलिन हो जाने पर मेरे जीवन को धिक्कार है।' दयालु शक्र अपने सारथि मातलि से कहता है कि यदि भय और दीनता से युक्त ये बेचारे गरुड़ के बच्चे रथवेग से मारे जाते हैं तो मुझ देवेन्द्र का यश मलिन हो जायेगा और मलिन यश वाले जीवन को धिक्कार है। अतः मुझे इस समय अपनी रक्षा की अपेक्षा घोंसलों में स्थित अजातपंख वाले गरुड़ के बच्चों की रक्षा अधिक प्रिय है।

**2. तत्पराक्रमस्य अतिशयसंभावनया भयाकुलाः प्रणतिं गताः**

जब शक्र का रथ गरुड़ के बच्चों को बचाने की दृष्टि से पुनः वापस मुड़ा तो शक्र का पीछा करते हुए दैत्यों ने सोचा कि 'अवश्य ही शक्र विशेष शक्ति सम्पन्न होकर हमसे लड़ने के लिए वापस आ रहा है'। उन्होंने भयभीत हो अपने आप शक्र के समक्ष आत्मसमर्पण कर दिया। इस प्रकार दयाभाववश गरुड़ के बच्चों की रक्षा के कारण जिस आत्मबल के साथ शक्र वापस लौटे तो वह सैन्यदल के बिना भी दैत्यों के द्वारा मनोवैज्ञानिक प्रभाव के कारण महान् पराक्रमी माने गए।

**3. सहर्षलज्जैः देवैः सत्क्रियमाणः**

हर्ष के साथ और लज्जा भाव से युक्त देवताओं के द्वारा सत्कार किये जाते हुए शक्र दैत्यों के समर्पण के पश्चात् विजयश्री के साथ जब वापस आये तो देवताओं ने हर्ष एवं लज्जा से युक्त होकर शक्र का सम्मान किया। इसका भाव है कि जहाँ एक ओर दैत्यों पर विजय की प्रसन्नता थी वहीं उन्हें लज्जा इस बात की थी कि वे युद्ध में शक्र को अकेला छोड़कर असुरों के शस्त्रों से भयभीत हो भाग आये थे फिर भी देवेन्द्र अकेले ही असुरों को जीतकर आए।

**4. पापं समाचरति .............लङ्घयितुं समर्थः**

***अन्वयः***

वीतघृणः जघन्यः पापम् समाचरति सघृणः मध्यबुद्धिः तु आपदम् प्राप्य एव सघृणः (भवति), साधुजनः तु समुद्रः वेलाम् इव प्राणात्यये अपि स्ववृत्तिं लङ्घयितुं न समर्थः (भवति)।

***भावार्थः*** नीच व्यक्ति निर्दय होकर सदा पाप कर्म करता है, दयालु मध्यबुद्धि वाला तो आपत्ति में पड़कर पाप करता है किन्तु सज्जन लोग तो प्राणों का संकट होने पर भी अपने दयालु स्वभाव को नहीं छोड़ते जिस प्रकार समुद्र अपने तट का उल्लंघन कभी नहीं करता।

ध्यान दें यहाँ 'घृणा' शब्द का अर्थ है दया, वीतघृणः का अर्थ है दया से रहित।

## व्याकरणबिन्दवः

### सन्धिविच्छेदः

| | | | | |
|---|---|---|---|---|
| मृत्युरेव | = | मृत्युः | + | एव |
| इत्युक्त्वा | = | इति | + | उक्त्वा |
| पुनरायान्तम् | = | पुनः | + | आयान्तम् |
| तस्मादुच्यते | = | तस्मात् | + | उच्यते |
| प्राप्यापदम् | = | प्राप्य | + | आपदम् |
| प्राणात्ययेऽपि | = | प्राणात्यये | + | अपि |

### समस्तपदानां विग्रहः

| | | | |
|---|---|---|---|
| दैत्यराजेन | = | दैत्यानां राजा दैत्यराजः | (षष्ठीतत्पुरुषः) |
| भयदीनमुखानि | = | भयात् दीनानि मुखानि येषां तानि | (बहुव्रीहिः) |
| मलिनयशसः | = | मलिनं यशः यस्य तस्य | (बहुव्रीहिः) |
| वीतघृणः | = | वीता घृणा यस्य सः | (बहुव्रीहिः) |
| सघृणः | = | घृणया सह विद्यमानः | (बहुव्रीहिः) |

### पद-परिचयः

| | | |
|---|---|---|
| संचूर्ण्य | = | सम् + चूर्ण + ल्यप् |
| उक्त्वा | = | वच् + क्त्वा |
| विलोक्य | = | वि + लोक् + ल्यप् |

## पाठगतप्रश्नाः 13.3

1. **अनन्तरं सहर्षलज्जैः देवैः सत्क्रियमाणः जयश्रिया अलङ्कृतः शक्रः स्वपुरम् अगच्छत्।**

   (क) देवैः सत्क्रियमाणः कः स्वपुरम् अगच्छत्?

   ........................................................................

(ख) अत्र 'देवैः' पदस्य किं विशेषणपदम् प्रयुक्तम्?

.........................................................................

(ग) 'जयश्रिया अलङ्कृतः' इति कस्य विशेषणम्?

.........................................................................

**2. 'भयदीनमुखानि अमूनि सत्त्वानि रथवेगेन संचूर्ण्य मलिनयशसः मे जीवितं धिक्!**

(क) भयदीनमुखानि कानि आसन्? ..................................................

(ख) अत्र 'मे' पदं कस्मै प्रयुक्तम्? ..................................................

(ग) 'धिक्' योगे अत्र का विभक्तिः प्रयुक्ता? ..................................................

## किमधिगतम्

1. बोधिसत्त्वः एकस्मिन् जन्मनि दान-दया संयमशीलः शक्रः अभवत्।
2. शक्रः ऐश्वर्यसम्पन्नः, महावीरः दर्परहितः करुणापरः सर्वसत्त्वानुकम्पी च आसीत्।
3. करुणा-संयम-परोपकारादिभावैः विभूषितः नरः जीवने यशः मानं च भजते।
4. साधवः प्राणसंकटेऽपि स्वाभाविकीं दयालुतां परोपकारितां च न त्यजन्ति।
5. तत्पुरुषसमासस्य विग्रहे उत्तरपदं प्रधानं भवति।
6. यावत्-तावत् यथा-तथा इतः-ततः अव्यययुग्मानां प्रयोगः एकस्मिन् एव वाक्ये भवति।
7. 'क्त्वा' पूर्वकालिकक्रियासूचकः कृत् प्रत्ययः भवति।
8. यदि धातोः पूर्वम् उपसर्गः भवेत् तदा क्त्वा स्थाने ल्यप् भवति।
9. प्रति, धिक् सह, भयार्थकयोगे द्वितीया, तृतीया पञ्चमी च प्रयुज्यते।

## योग्यताविस्तारः

**सन्दर्भग्रन्थ-लेखकपरिचयः**

प्रस्तुत पाठ का आधार 'जातकमाला' की एक कथा 'शक्रजातकम्' है। 'जातकमाला' के लेखक आर्यशूर हैं। इनका रचनाकाल 400 ई. है।

## भावविस्तारः

महात्मा बुद्ध के पूर्वजन्मों की कहानियाँ पालिभाषा में 500 से अधिक जातकों में संगृहीत हैं। आर्यशूर ने कुछ महत्त्वपूर्ण जातकों को संस्कृत भाषा में जातकमाला में संगृहीत किया है। विभिन्न जन्मों में बुद्ध ने किस प्रकार जीवों पर दया की इसका विवरण इनमें प्रस्तुत किया गया है। उन जन्मों में वे बोधिसत्त्व के नाम से प्रसिद्ध हुए। इन कथाओं का उद्देश्य मानव में जीवनमूल्यों की स्थापना करना है। इनमें सत्य, दया, दान, दम, परोपकार, उदारता, समता आदि गुणों के द्वारा मानव जीवन की उपयोगिता सिद्ध की गई है। महात्मा बुद्ध अपने अनेक जन्मों में बोधिसत्त्व देवराज इन्द्र, राजा, व्यापारी, सेठ, नाविक, हाथी, शशक, मृग, पक्षी आदि बने किन्तु उनकी प्रवृत्ति परोपकार में रही। उन्होंने प्रत्येक जन्म में सत्य, त्याग, दम का आदर्श प्रस्तुत किया है।

## भाषाविस्तारः

### (क) उपपद-विभक्तयः

विभक्ति दो प्रकार की होती है 1. कारक विभक्ति 2. उपपद विभक्ति। कारक को सूचित करने वाली विभक्ति को कारक विभक्ति कहते हैं तथा जो पद विशेष अर्थात् प्रति, विना, सह, नमः आदि पदों के योग से जो विभक्ति होती है उसे उपपद विभक्ति कहते हैं। जैसे– रामः कलमेन लिखति (राम कलम से लिखता है में 'कलमेन' में करण कारक के अर्थ में तृतीया विभक्ति है। अतः यह कारक विभक्ति है। जब कि 'रामः पुत्रेण सह गच्छति' (राम पुत्र के साथ जाता है) वाक्य में 'पुत्रेण' में तृतीया 'सह' पद के योग के कारण है अतः यह उपपद विभक्ति है।

| **पदानि** | **द्वितीयाविभक्तिः** |
|---|---|
| (क) (पदों के योग में) | उदाहरणानि |
| उभयतः (दोनों ओर) | राजमार्गम् उभयतः वृक्षाः सन्ति। |
| परितः (चारों ओर) | ग्रामं परितः क्षेत्राणि सन्ति। |
| धिक् (धिक्कार) | अशिक्षितम् धिक्। |
| प्रति (ओर) | माता पुत्रं प्रति वदति। |

(ख) धातुओं के योग में

| | |
|---|---|
| याच् (माँगना) | निर्धनः धनिकम् धनं याचते। |
| प्रच्छ् (पूछना) | छात्रः गुरुं प्रश्नं पृच्छति। |

| | |
|---|---|
| अधि + शी | अधिशेते (सोता है) |
| अधि + स्था | अधितिष्ठति (बैठता है) रविः पर्यङ्कम् अधिशेते (रवि पलंग पर सोता है) |
| अधि + आस् | अध्यास्ते, नृपः सिंहासनम् अधितिष्ठति/अध्यास्ते। (राजा सिंहासन पर बैठता है) |

**तृतीया विभक्तिः**

| | पदानि | उदाहरणानि |
|---|---|---|
| (1) | सार्धम्/साकम्/सह (साथ) | त्वम् मित्रेण सार्धम्/साकम्/सह क्रीडसि। |
| (2) | अलम् (बस) | अलम् श्रमेण। |
| (3) | तुल्यः/सदृशः | दानेन तुल्यः/सदृशः निधिः नास्ति। |
| (4) | अङ्ग्विकारार्थकपदयोगे (खञ्जः, अन्धः, काणः) | पादेन खञ्जः। नेत्राभ्याम् अन्धः। नेत्रेण काणः |

**चतुर्थीविभक्तिः**

| | |
|---|---|
| (1) नमः (नमस्कार) | गुरवे नमः। मातृभूम्यै नमः। |
| (2) स्वस्ति (कल्याण) | नृपाय स्वस्ति। |

**धातुयोगे**

| | |
|---|---|
| (1) रुच् (अच्छा लगना) | दिनेशाय रोचते फलाहारः। |
| (2) क्रुध् (गुस्सा करना) | त्वम् दुष्टाय क्रुध्यसि। |

**पञ्चमी विभक्तिः**

| | |
|---|---|
| (1) बहिः (बाहर) | ग्रामात् बहिः उद्यानम् अस्ति। |
| (2) अनन्तरम् (बाद) | उद्यानात् अनन्तरं पाठशाला अस्ति। |
| (3) 'तुलना' अर्थे | अशोकः श्यामात् पटुतरः। |
| (4) 'भय' अर्थे | बालः सिंहात् बिभेति। |

**षष्ठीः विभक्तिः/सप्तमीविभक्तिः**

(1) निर्धारण-अर्थे (अनेक में से एक का निश्चय करना)

टिप्पणी

(2) युधिष्ठिरः पाण्डवानाम्/पाण्डवेषु ज्येष्ठः आसीत्।

(3) नदीनाम्/नदीषु वा गंगा श्रेष्ठा।

**सप्तमी विभक्तिः**

| | |
|---|---|
| (1) 'स्निह्' धातुयोगे (प्यार करना) | माता पुत्रे स्निह्यति। |
| (2) 'विश्वस्' धातुयोगे (विश्वास करना) | अहम् त्वयि विश्वसिमि। |

## (ख) तत्पुरुषसमासः

दो या दो से अधिक पदों का तत्पुरुष समास होता है। समास के पूर्व पद में प्रथमा द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी व सप्तमी विभक्तियाँ रहती हैं तथा उत्तर पद में कोई भी विभक्ति रह सकती है। समास करने पर दोनों विभक्तियों का लोप हो जाता है। इस समास में उत्तर पद के अर्थ की प्रधानता होती है। जैसे राज्ञः पुत्रः राजपुत्रः। इसमें 'पुत्र' अर्थ प्रधान है। अन्य उदाहरण इस प्रकार हैं- द्वितीया-रामम् आश्रितः = रामाश्रितः,। शरणम् आपन्नः = शरणापन्नः। तृतीया- सुखेन युक्तः = सुखयुक्तः, विद्यया हीनः=विद्याहीनः, ज्ञानेन शून्यः=ज्ञानशून्यः। चतुर्थी-पाठाय शाला=पाठशाला, धनाय लोभः=धनलोभः। पञ्चमी-चौरात् भयम्=चौरभयम्, वृक्षात् पतितः=वृक्षपतितः, पापात् मुक्तः=पापमुक्तः। षष्ठी-राज्ञः पुरुषः राजपुरुषः सुखस्य भोगः= सुखभोगः, सप्तमी-युद्धे निपुणः=युद्धनिपुणः, जले मग्नः=जलमग्नः, कार्ये दक्षः= कार्यदक्षः।

## (ग) धातुरूपाणि

'कृ' (करना)

**लट् लकारः (वर्तमानकालः) 'परस्मैपदम्'**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः पुरुषः | करोति | कुरुतः | कुर्वन्ति |
| मध्यमः पुरुषः | करोषि | कुरुथः | कुरुथ |
| उत्तमः पुरुषः | करोमि | कुर्वः | कुर्मः |

**लङ् लकारः (भूतकालः)**

| | | | |
|---|---|---|---|
| प्रथमः पुरुषः | अकरोत् | अकुरुताम् | अकुर्वन् |
| मध्यमः पुरुषः | अकरोः | अकुरुतम् | अकुरुत |

| | | | |
|---|---|---|---|
| उत्तमः पुरुषः | अकरवम् | अकुर्व | अकुर्म |

**लोट् लकारः ( आज्ञार्थे )**

| | | | |
|---|---|---|---|
| प्रथमः पुरुषः | करोतु | कुरुताम् | कुर्वन्तु |
| मध्यमः पुरुषः | कुरु | कुरुतम् | कुरुत |
| उत्तमः पुरुषः | करवाणि | करवाव | करवाम |

**लृट् लकारः ( भविष्यत्कालः )**

| | | | |
|---|---|---|---|
| प्रथमः पुरुषः | करिष्यति | करिष्यतः | करिष्यन्ति |
| मध्यमः पुरुषः | करिष्यसि | करिष्यथः | करिष्यथ |
| उत्तमः पुरुषः | करिष्यामि | करिष्यावः | करिष्यामः |

**विधिलिङ् ( इच्छा, निमंत्रण, अनुरोध )**

| | | | |
|---|---|---|---|
| प्रथमः पुरुषः | कुर्यात् | कुर्याताम् | कुर्युः |
| मध्यमः पुरुषः | कुर्याः | कुर्यातम् | कुर्यात |
| उत्तमः पुरुषः | कुर्याम् | कुर्याव | कुर्याम |

## पाठान्तप्रश्नाः

**1. अधोलिखितप्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत।**

(क) कः देवानामधिपः शक्रः अभवत्?

..................................................

(ख) दैत्यानां कीदृशं सैन्यबलम् आसीत्?

..................................................

(ग) शक्रः कीदृशं रथम् अभिरुह्य योद्धुं गतवान्?

..................................................

(घ) खगालयाः कैः युक्ताः आसन्?

..................................................

टिप्पणी

(ङ) साधुजनः प्राणात्ययेऽपि कां न त्यजति?

..................................................

**2. एतानि वाक्यानि घटनाक्रमेण पुनः लिखत**

(क) तस्य लक्ष्मीं दृष्ट्वा दैत्यगणाः ईर्ष्यालवः जाताः।

....................................................................................................

(ख) एकदा बोधिसत्त्वः देवानामधिपः शक्रः अभवत्।

....................................................................................................

(ग) परस्परं युद्धे जाते शक्रः एव विजयी अभवत्।

....................................................................................................

(घ) समुद्रतीरान्ते देवासुरयोः मध्ये रणः प्रारब्धः।

....................................................................................................

**3. शक्रस्य चरित्रं पञ्चवाक्येषु संस्कृतभाषायां लिखत।**

1. ......................................................................................................................
2. ......................................................................................................................
3. ......................................................................................................................
4. ......................................................................................................................
5. ......................................................................................................................

**4. (क) विग्रह-पदैः समस्तपदानि रचयत**

1. राज्ञः लक्ष्मीः .............
2. गरुडानां नीडानि .............
3. करुणाम् आपन्नः .............
4. आत्मनः रक्षणम् .............
5. पक्षिणां रक्षणम् .............

**(ख) निर्दिष्टधातु-प्रत्यय-योगेन वाक्यपूर्तिं कुरुत।**

(1) अशोकः प्रातः (भ्रम् + क्त्वा) ............ पठति।

(2) लता समाचारं (श्रु + क्त्वा) ............ खादति।

(3) विभा गुरुम् (प्र + नम् + ल्यप्) ............ तिष्ठति।

(4) त्वम् मम समीपे (उप + विश् + ल्यप्) ............ पठ।

**5. उचितशब्दरूपस्य प्रयोगं कुरुत।**

यथा–शिक्षकः (छात्र) छात्रम् प्रति वदति।

(क) त्वम् (अस्मद्) ............ प्रति किं वदसि?

(ख) (कृपण) ............ धिक्! यः न ददाति न भुङ्क्ते।

(ग) सैनिकः (सैनिक)............सह गच्छति।

(घ) (दुष्ट) ............ भीतः सज्जनः गृहं त्यजति।

## उत्तराणि

**बोधप्रश्नाः**

1. (क) शशिनः प्रभेव (ख) प्रजारक्षणाय (ग) आत्मरक्षणम् (घ) वीतघृणः

2. (क) + (iii), (ख) + (i), (ग) + (ii), (घ) + (v), (ङ) + (iv)

**पाठगतप्रश्नाः 13.1**

1. (क) दानसंयमकरुणादिभिः (ख) सर्वलोकेषु (ग) प्रजारक्षणाय (घ) समुद्रतीरान्ते

2. क. √ ख. X ग. √ घ. X

3. (i) अलङ्कृतः, (ii) प्रारब्धः, (iii) अवरुध्य, (iv) धिक्

**पाठगतप्रश्नाः 13.2**

1. क. शक्रस्य, ख. मातलिः, ग. अजातपक्षैः, घ. शक्रः मातलिम् प्रति,

2. क. यावत्, ख. तथा, ग. इतः, घ. तदा,

3. क. दैत्येभ्यः, ख. रथस्य, ग. वृक्षात्, घ. देवसेनाम्

**पाठगतप्रश्नाः 13.3**

1. क. शक्रः, ख. सहर्षलज्जैः, ग. शक्रस्य

2. क. सत्त्वानि, (गरुडस्य शावकाः), ख. शक्राय, ग. द्वितीया

**पाठान्तप्रश्नाः**

1. क. बोधिसत्त्वः, ख. द्विरद-रथ-तुरग-पदातियुक्तम् ग. हैमम् घ. अजातपक्ष-पक्षिशावकैः ङ. स्ववृत्तिम्

2. ख,क,घ,ग

3. (i) शक्रः देवानाम् अधिपः आसीत्।

   (ii) स ऐश्वर्यसम्पन्नः आसीत्।

   (iii) सः दानशीलः संयमी च आसीत्।

   (iv) सः महावीरः आसीत्।

   (v) तस्य हृदयं करुणामयम् आसीत्। एवमेव कानि अपि पञ्च वाक्यानि।

4. क-(1) राजलक्ष्मीः, (2) गरुडनीडानि, (3) करुणापन्नः, (4) आत्मरक्षणम्, (5) पक्षिरक्षणम्,

   ख- (i) भ्रमित्वा, (ii)श्रुत्वा, (iii) प्रणम्य, (iv) उपविश्य,

5. क. अस्मान्, ख. कृपणं, ग. सैनिकैः, घ. दुष्टेभ्यः